# দেবী খড্গমালাস্তোত্ররত্নম্

{॥ দেবী খড্গমালাস্তোত্ররত্নম্ ॥}

প্রার্থনা

হ্রীঙ্কারাননগর্ভিতানলশিখাং সৌঃ ক্লীঙ্কলাম্ বিভ্রতীং

সৌবর্ণাম্বরধারিণীং বরসুধাধৌতাং ত্রিনেত্রোজ্জ্বলাম্ ।

বন্দে পুস্তকপাশমঙ্কুশধরাং স্রগ্ভূষিতামুজ্জ্বলাং

ত্বাং গৌরীং ত্রিপুরাং পরাৎপরকলাং শ্রীচক্রসঞ্চারিণীম্ ॥

অস্য শ্রী শুদ্ধশক্তিমালামহামন্ত্রস্য, উপস্থেন্দ্রিযাধিষ্ঠাযী

বরুণাদিত্য ঋষযঃ দেবী গাযত্রী ছন্দঃ সাত্বিক

ককারভট্টারকপীঠস্থিত কামেশ্বরাঙ্কনিলযা মহাকামেশ্বরী শ্রী

ললিতা ভট্টারিকা দেবতা, ঐং বীজং ক্লীং শক্তিঃ, সৌঃ কীলকং মম

খড্গসিদ্ধ্যর্থে সর্বাভীষ্টসিদ্ধ্যর্থে জপে বিনিযোগঃ, মূলমন্ত্রেণ

ষডঙ্গন্যাসং কুর্যাত্ ।

ধ্যানম্

তাদৃশং খড্গমাপ্নোতি যেব হস্তস্থিতেনবৈ

অষ্টাদশমহাদ্বীপসম্রাড্ভোক্তাভবিষ্যতি

আরক্তাভান্ত্রিনেত্রামরুণিমবসনাম্ রত্নতাটঙ্করম্যাং

হস্তাম্ভোজৈস্সপাশাঙ্কুশমদনধনুস্সাযকৈর্বিস্ফুরন্তীম্ ।

আপীনোত্তুঙ্গু বক্ষোরুহকলশলুঠত্তারহারোজ্জ্বলাঙ্গীং

ধ্যাযেদম্ভোরুহস্থামরুণিমবসনামীশ্বরীমীশ্বরাণাম্ ॥

লমিত্যাদিপঞ্চ পূজাম্ কুর্যাত্, যথাশক্তি মূলমন্ত্রম্ জপেত্ ।

লং - পৃথিবীতত্ত্বাত্মিকায়ৈ শ্রী ললিতাত্রিপুরসুন্দরী পরাভট্টারিকায়ৈ

গন্ধং পরিকল্পযামি - নমঃ

হং - আকাশতত্ত্বাত্মিকায়ৈ শ্রী ললিতাত্রিপুরসুন্দরী পরাভট্টারিকায়ৈ পুষ্পং

পরিকল্পযামি - নমঃ

যং - বাযুতত্ত্বাত্মিকায়ৈ শ্রী ললিতাত্রিপুরসুন্দরী পরাভট্টারিকায়ৈ ধূপং

পরিকল্পযামি - নমঃ

রং - তেজস্তত্ত্বাত্মিকায়ৈ শ্রী ললিতাত্রিপুরসুন্দরী পরাভট্টারিকায়ৈ দীপং

পরিকল্পযামি - নমঃ

বং - অমৃততত্ত্বাত্মিকায়ৈ শ্রী ললিতাত্রিপুরসুন্দরী পরাভট্টারিকায়ৈ

অমৃতনৈবেদ্যং পরিকল্পযামি - নমঃ

সং - সর্বতত্ত্বাত্মিকায়ৈ শ্রী ললিতাত্রিপুরসুন্দরী পরাভট্টারিকায়ৈ

তাম্বূলাদিসর্বোপচারান্ পরিকল্পযামি - নমঃ

শ্রী দেবী সম্বোধনং - ১

ওঁ ঐং হ্রীং শ্রীং ঐং ক্লীং সৌঃ ওঁ নমস্ত্রিপুরসুন্দরি,

ন্যাসাঙ্গদেবতাঃ -৬

হৃদযদেবি, শিরোদেবি, শিখাদেবি, কবচদেবি, নেত্রদেবি,

অস্ত্রদেবি,

তিথিনিত্যাদেবতাঃ -১৬

কামেশ্বরি, ভগমালিনি, নিত্যক্লিন্নে, ভেরুণ্ডে, বহ্নিবাসিনি,

মহাবজ্রেশ্বরি, শিবদূতি, ত্বরিতে, কুলসুন্দরি, নিত্যে,

নীলপতাকে, বিজযে, সর্বমঙ্গলে, জ্বালামালিনি, চিত্রে,

মহানিত্যে,

দিব্যৌঘগুরবঃ -৭

পরমেশ্বর, পরমেশ্বরি, মিত্রেশময়ি, উড্ডীশময়ি,

চর্যানাথময়ি, লোপামুদ্রময়ি, অগস্ত্যময়ি,

সিদ্ধৌঘগুরবঃ -৪

কালতাপশময়ি, ধর্মাচার্যময়ি, মুক্তকেশীশ্বরময়ি, দীপকলানাথময়ি,

মানবৌঘগুরবঃ -৮

বিষ্ণুদেবময়ি, প্রভাকরদেবময়ি, তেজোদেবময়ি, মনোজদেবময়ি,

কল্যাণদেবময়ি, বাসুদেবময়ি, রত্নদেবময়ি, শ্রীরামানন্দময়ি,

শ্রীচক্র প্রথমাবরণদেবতাঃ -৩২

অণিমাসিদ্ধে, লঘিমাসিদ্ধে, গরিমাসিদ্ধে, মহিমাসিদ্ধে,

ঈশিত্বসিদ্ধে, বশিত্বসিদ্ধে, প্রাকাম্যসিদ্ধে, ভুক্তিসিদ্ধে,

ইচ্ছাসিদ্ধে, প্রাপ্তিসিদ্ধে, সর্বকামসিদ্ধে, ব্রাহ্মি,

মাহেশ্বরি, কৌমারি, বৈষ্ণবি, বারাহি, মাহেন্দ্রি, চামুণ্ডে,

মহালক্ষ্মি, সর্বসঙ্ক্ষোভিণি, সর্ববিদ্রাবিণি, সর্বাকর্ষিণি,

সর্ববশঙ্করি, সর্বোন্মাদিনি, সর্বমহাঙ্কুশে, সর্বখেচরি,

সর্ববীজে, সর্বযোনে, সর্বত্রিখণ্ডে, ত্রৈলোক্যমোহন

চক্রস্বামিনি, প্রকটযোগিনি,

শ্রীচক্র দ্বিতীযাবরণদেবতাঃ -১৮

কামাকর্ষিণি, বুদ্ধ্যাকর্ষিণি, অহংকারাকর্ষিণি, শব্দাকর্ষিণি,

স্পর্শাকর্ষিণি, রূপাকর্ষিণি, রসাকর্ষিণি, গন্ধাকর্ষিণি,

চিত্তাকর্ষিণি, ধৈর্যাকর্ষিণি, স্মৃত্যাকর্ষিণি, নামাকর্ষিণি,

*Stotram Digitalized By [Sanskritdocuments.org](http://sanskritdocuments.org)*

বীজাকর্ষিণি, আত্মাকর্ষিণি, অমৃতাকর্ষিণি, শরীরাকর্ষিণি,

সর্বাশাপরিপূরকচক্রস্বামিনি, গুপ্তযোগিনি,

শ্রীচক্র তৃতীযাবরণদেবতাঃ -১০

অনঙ্গকুসুমে, অনঙ্গমেখলে, অনঙ্গমদনে, অনঙ্গমদনাতুরে,

অনঙ্গরেখে, অনঙ্গবেগিনি, অনঙ্গাঙ্কুশে, অনঙ্গমালিনি,

সর্বসঙ্ক্ষোভণচক্রস্বামিনি, গুপ্ততরযোগিনি,

শ্রীচক্র চতুর্থাবরণদেবতাঃ -১৬

সর্বসঙ্ক্ষোভিণি, সর্ববিদ্রাবিনি, সর্বাকর্ষিণি,

সর্বহ্লাদিনি, সর্বসম্মোহিনি, সর্বস্তম্ভিনি, সর্বজৃম্ভিণি,

সর্ববশঙ্করি, সর্বরঞ্জনি, সর্বোন্মাদিনি, সর্বার্থসাধিকে,

সর্বসম্পত্তিপূরিণি, সর্বমন্ত্রমযি, সর্বদ্বন্দ্বক্ষযঙ্করি,

সর্বসৌভাগ্যদাযকচক্রস্বামিনি, সম্প্রদাযযোগিনি,

শ্রীচক্র পঞ্চমাবরণদেবতাঃ -১২

সর্বসিদ্ধিপ্রদে, সর্বসম্পৎপ্রদে, সর্বপ্রিযঙ্করি,

সর্বমঙ্গলকারিণি, সর্বকামপ্রদে, সর্বদুঃখবিমোচনি,

সর্বমৃত্যুপ্রশমনি, সর্ববিঘ্ননিবারিণি, সর্বাঙ্গসুন্দরি,

সর্বসৌভাগ্যদাযিনি, সর্বার্থসাধকচক্রস্বামিনি,

কুলোত্তীর্ণযোগিনি,

শ্রীচক্র ষষ্টাবরণদেবতাঃ -১২

সর্বজ্ঞে, সর্বশক্তে, সর্বৈশ্বর্যপ্রদাযিনি, সর্বজ্ঞানমযি,

সর্বব্যাধিবিনাশিনি, সর্বাধার স্বরূপে, সর্বপাপহরে,

সর্বরক্ষাস্বরূপিণি, সর্বেপ্সিতফলপ্রদে, সর্বরক্ষাকর

চক্রস্বামিনি, নিগর্ভযোগিনি,

শ্রীচক্র সপ্তমাবরণদেবতাঃ -১০

বশিনি, কামেশ্বরি, মোদিনি, বিমলে, অরুণে, জযিনি,

সর্বেশ্বরি, কৌলিনিবশিনি, সর্বরোগহরচক্রস্বামিনি,

রহস্যযোগিনি,

শ্রীচক্র অষ্টমাবরণদেবতাঃ -৯

বাণিনি, চাপিনি, পাশিনি, অঙ্কুশিনি, মহাকামেশ্বরি,

মহাবজ্রেশ্বরি, মহাভগমালিনি, সর্বসিদ্ধিপ্রদচক্রস্বামিনি,

অতিরহস্যযোগিনি,

শ্রীচক্র নবমাবরণদেবতাঃ -৩

শ্রী শ্রী মহাভট্টারিকে, সর্বানন্দমযচক্রস্বামিনি,

পরাপরাতিরহস্যযোগিনি,

নবচক্রেশ্বরী নামানি -৯

ত্রিপুরে, ত্রিপুরেশি, ত্রিপুরসুন্দরি, ত্রিপুরবাসিনি,

ত্রিপুরাশ্রীঃ, ত্রিপুরমালিনি, ত্রিপুরসিদ্ধে, ত্রিপুরাম্বা,

মহাত্রিপুরসুন্দরি,

শ্রীদেবী বিশেষণানি - নমস্কারনবাক্ষরীচ -৯

মহামহেশ্বরি, মহামহারাজ্ঞি, মহামহাশক্তে, মহামহাগুপ্তে,

মহামহাজ্ঞপ্তে, মহামহানন্দে, মহামহাস্কন্ধে, মহামহাশযে,

মহামহা শ্রীচক্রনগরসাম্রাজ্ঞি, নমস্তে নমস্তে নমস্তে নমঃ।

ফলশ্রুতিঃ

এষা বিদ্যা মহাসিদ্ধিদাযিনী স্মৃতিমাত্রতঃ।

অগ্নিবাতমহাক্ষোভে রাজারাষ্ট্রস্যবিপ্লবে ॥

লুণ্ঠনে তস্করভযে সঙ্গ্রামে সলিলপ্লবে ।

সমুদ্রযানবিক্ষোভে ভূতপ্রেতাদিকে ভযে ॥

অপস্মারজ্বরব্যাধিমৃত্যুক্ষামাদিজেভযে ।

শাকিনী পূতনাযক্ষরক্ষঃকূষ্মাণ্ডজে ভযে ॥

মিত্রভেদে গ্রহভযে ব্যসনেষ্বাভিচারিকে ।

অন্যেষ্বপি চ দোষেষু মালামন্ত্রং স্মরেন্নরঃ ॥

সর্বোপদ্রবনির্মুক্তস্সাক্ষাচ্ছিবমযোভবেত্ ।

আপৎকালেনিত্যপূজাম্ বিস্তারাৎকর্তুমারভেত্ ॥

একবারং জপধ্যানম্ সর্বপূজাফলং লভেত্ ।

নবাবর্ণদেবীনাং ললিতাযা মহৌজনঃ ॥

একত্রগণনারূপোবেদবেদাঙ্গগোচরঃ ।

সর্বাগমরহস্যার্থঃ স্মরণাৎপাপনাশিনী ॥

ললিতাযামহেশান্যা মালা বিদ্যামহীযসি ।

নরবশ্যং নরেন্দ্রাণাং বশ্যং নারীবশঙ্করম্ ॥

অণিমাদিগুণৈশ্বর্যং রঞ্জনং পাপভঞ্জনম্ ।

তত্তদাবরণস্থাযি দেবতাবৃন্দমন্ত্রকম্ ॥

মালামন্ত্রং পরম্ গুহ্যাং পরং ধামপ্রকীর্তিতম্ ।

শক্তিমালাপঞ্চধাস্যাচ্ছিবমালাচতাদৃশি ॥

তস্মাদ্গোপ্যতরাদ্গোপ্যং রহস্যং ভুক্তিমুক্তিদম্ ॥

ইতি শ্রী বামকেশ্বরতন্ত্রে উমামহেশ্বরসংবাদে

দেবীখড্গমালাস্তোত্ররত্নং সমাপ্তম্ ।

ব্igskip

Encoded by Sarada Susarla

Proofread by Sarada Susarla; Anantanarayanan, Sunder Hattangadi, Ajit

Krishnan

Please send corrections to sanskrit@cheerful.com

Last updated ত্oday

http://sanskritdocuments.org

Devi Khadgamala Stotra Ratnam Lyrics in Bengali PDF
% File name : khadgamala.itx
% Category : tantra
% Location : doc_devii

% Author : Unknown
% Language : Sanskrit
% Subject : tantra/hinduism/devi worship
% Transliterated by : Sarada Susarla
% Proofread by : Sarada Susarla; Anantanarayanan, Sunder Hattangadi, Ajit Krishnan
% Description-comments : Vamakeshvara Tantra
% Latest update : September 28, 2011, December 13, 2014
% Send corrections to : Sanskrit@cheerful.com
% Site access : http://sanskritdocuments.org
%
% This text is prepared by volunteers and is to be used for personal study
% and research. The file is not to be copied or reposted for promotion of
% any website or individuals or for commercial purpose without permission.
% Please help to maintain respect for volunteer spirit.
%

We acknowledge well-meaning volunteers for Sanskritdocuments.org and other sites to have built the collection of Sanskrit texts.
Please check their sites later for improved versions of the texts.
This file should strictly be kept for personal use.
PDF file is generated [ December 14, 2015 ] at Stotram Website